© 2018 IJSRST | Volume 4 | Issue 7 | Print ISSN: 2395-6011 | Online ISSN: 2395-602X

# वाक्यपदीयदृशा कर्मत्वशक्तिः



सोनमती पटेल
असिस्टेंट प्रोफेसर (संस्कृत विभाग)
आर्यकन्या डिग्री कालेज प्रयागराज

**शोधसारः -** आचार्यभर्तृहरिणा महाभाष्यमधिकृत्य वाक्यपदीयं नाम कारिकारूपं विस्तीर्णं व्याख्यानं कृतम्। त्रिकाण्डात्मकस्य वाक्यपदीयस्य तृतीये पदकाण्डे (प्रकीर्णकाण्डे) चतुर्दशसमुद्देशाः उपवर्णिताः। तत्र सप्तमो साधनसमुद्देशः स्यात्। समुद्देशेऽस्मिन् नानागमनुसारिभिः साधनं शक्तिपरमनूच्य स्वौजस्-इत्यादिविभक्तिविधानक्रमेण भर्तृहरिणा कर्मत्वादिकारकं व्याख्यातम्। तत्रादौ क्रमप्राप्तं कर्मकारकं (कर्तुः क्रियया आप्तुं इष्टतमं कारकं कर्म) भेदसहितम् विवेचितम्। महाभाष्यस्य व्याख्यानैः ज्ञायते यत् त्रिविधं कर्म भाष्यकृद्भिः अनुमतम्। परञ्च भर्तृहरिः स्वकल्पनाचातुर्येण कर्मणः अपरम् चतुर्विधं भेदं अङ्गीचकार। "निर्वर्त्यं च विकार्यं च प्राप्यं चेति त्रिधा मतं। तत्रेप्सिततमं कर्म चतुर्धा अन्यत्तु कल्पितं" (साधनसमुद्देशः, कारिका, ४५)। तन्मते त्रिविधं कर्मातिरिच्य औदासीन्यादि चतुर्विधमपि कर्म अभिहितम्। तत्र प्रथमं तावत् औदासीन्यम्– 'ग्रामं गच्छन् तृणं पश्यति', द्वितीयं द्वेष्यम्- 'विषं भुङ्क्ते', तृतीयं अपादानादिविवक्षितं – 'गां दोग्धि पयः', तुरीयं अन्यकारकपूर्वकम् –क्रूरमभिद्रुह्यति। अतस्मात् महाभाष्यानुमोदितं त्रिविधं कर्म अपि च भर्तृहरेः कल्पनाचातुर्येण चतुर्विधं कर्म आहत्यऽस्मिन्शोधपत्रे सप्तविधं कर्म विश्लेषितम्।

**कूटशब्दाः -** कर्म, निर्वर्त्यं, विकार्यं, प्राप्यं, औदासीन्यं, द्वेष्यं।

वाक्यपदीयस्य साधनसमुद्देशे 'स्वौजसमौट्'[1] इति सूत्रनिर्दिष्टविभक्त्यनुक्रमानुसारेण कर्मादिकारकनिर्देशः प्रतिपादितः। परञ्च अष्टाध्याय्यां 'विप्रतिषेधे परं कार्यम्'[2] इति नियमसूत्रेण अनुरुध्य अपादानादिक्रमेण पाणिनिः उक्तः। भाष्येऽपि उक्तं 'अपादानसंज्ञामुत्तराणि कारकाणि बाधन्ते'[3] यथा- धनुषा विध्यति, कंसपात्र्यां

[1] पा०अ०, ४-१-२

[2] पा०अ०, १-४-२

[3] महाभाष्यम्, १-४-१

भुङ्क्तेत्यादयः। धनुषा विध्यति इति अपाययुक्तत्वात् ‘ध्रुवमपायेऽपादानम्’ इति अपादानसंज्ञा प्राप्नोति ‘साधकतमं करणम्’ इति च करणसंज्ञा। सा परा भवति[4]। तत्र विभक्तयः स्वौजसमित्यादयः वर्तन्ते। कारकमभिहितमनभिहितं च भवति। तत्र अभिहितकारकविभक्तिः प्रथमा। सा प्रतिपादकार्थमात्रे एव विधीयते। द्वितीयादयश्च सर्वाः विभक्तयः अनभिहिते कारके भवन्ति। अतो हेतो विप्रतिषेधसूत्रानुसारेण पाणिनिग्रन्थे विहितस्यापादानादिकारकविशेषनिर्देशस्यानेकप्रक्रमत्वात् ‘स्वौजसमौट्’ इति द्वितीयादिनिर्देशस्य च एकप्रक्रमत्वात् द्वितीयाद्यर्थानुसारेणेव इह कारकक्रमं आरभते। द्वितीयाद्यर्थश्च कर्मादिः। अष्टाध्याय्याः द्वितीयाध्याये तृतीयपादे विभक्तिविधायकं सूत्रं ‘कर्मणि द्वितीया’[5] इत्यादौ विहितम्। अतस्मात् कर्म एव पुरस्तात् व्याख्येयम्। प्रथमं तावत् भेदः प्रदर्श्यते।

कारकषट्कमध्ये ‘कर्तुरीप्सिततमं कर्म’[6] इति सूत्रेण विहितं कर्तुः क्रियया आप्तुमिष्यमाणतमं कर्म निर्वर्त्यं च विकार्यं च प्राप्यं चेति त्रेधा भाष्यकारादिसम्मतम् स्यात्। अनीप्सितं कर्म तु चतुर्धा कल्पितम्[7]। अर्थात् चतुर्विधम् कल्पनया स्वीकृतम्, न तु परंपरया।

तत्र कर्तुः क्रियया यद् इप्सिततमं तदेव कर्मलक्षणम् इति सूत्रनिर्दिष्टम्। तत् कर्म निर्वर्त्यविकार्यप्राप्यरूपैः त्रिभिः प्रकारैः सव्यभिचारवत् बोधव्यम्। सव्यभिचारो हेतुः साधारणासाधारणानुपसंहारिभेदात् त्रिविधं वर्तते[8]। तद्वत् कर्मापि। ‘कर्मण्यण्’ इत्यत्र सूत्रस्य भाष्येऽपि त्रिविधं कर्म प्रतिपादितम्। अत्र परंपरायाः आग्रहः वर्तते तेन। अपितु सूत्रान्तरविहितं चतुर्विधं कर्म कल्पनया स्वीकृतम्। इत्यत्र भर्तृहरेः कल्पनाचातुर्यं विवक्षाधीनत्वं वा स्वीकर्तव्यम्।

औदासीन्येन अर्थात् ताटस्थ्येन ईप्सिततमत्वानीप्सिततमत्वविरहेऽपि यत् प्राप्यम्। यच्च कर्तुरनीप्सितम् अर्थात् ईप्सितादन्यत् द्वेष्यं। यच्च अपादानादिसंज्ञाभिः अकथितमपि यत् कर्म तत्। अपि च कर्मातिरिक्तमपादानादिकारकं पूर्वम् प्राप्तं तद् बाधनेन विहितं कर्म इत्यर्थः[9]।

ताटस्थ्येन प्राप्यं कर्म यथा- ग्रामं गच्छन् वृक्षमूलमाश्रयति। तथैव यत् कर्तुः द्वेष्यं यथा- विषं भुङ्क्ते। चोरान् न पश्यति। द्वेष्यं चोरविषादिः औदासीन्येन प्राप्यं वृक्षमूलादिश्च इति कर्मद्वयं ‘तथायुक्तं चानीप्सितम्’[10] इति सूत्रेण विहितम्। तथा अपादानादिसंज्ञाविशेषाणामविवक्षया यत् कर्म तत्। यथा – ‘गां दोग्धि पयः’ इत्यत्र

[4] अपायविवक्षया विना धनुषो व्यधेः साधकतमत्वाभावात् संज्ञाद्वयप्रसंगे परत्वात्करणसंज्ञा भवति। महाभाष्यम्, प्रदीपः, १-४-१

[5] पा०अ०, २-३-२

[6] पा० अ०, १-४-४९

[7] निर्वर्त्यं च विकार्यं च प्राप्यं चेति त्रिधा मतम्, तत्रेप्सिततमं कर्म चतुर्धान्यत् तु कल्पितम्॥ साधनसमुद्देशः, कारिका, ४५

[8] सव्यभिचारोऽनैकान्तिकः। स त्रिविधः, साधारणासाधारणानुपसंहारिभेदात्। हेत्वाभासः, तर्कसंग्रहः

[9] औदासीन्येन यत् प्राप्यं यच्च कर्तुरनीप्सितम्। संज्ञान्तरैरनाख्यातं यद् यच्चाप्यन्यपूर्वकम्॥ साधनसमुद्देशः,कारिका, ४६

[10] पा०अ०,१-४-५०

गोरपादानत्वं प्राप्तं। गोरपादानत्वाविवक्षया 'अकथितञ्च'[11] सूत्रेण कर्मसंज्ञा वेदितव्या। कारकान्तरपूर्वकान्यस्मिन् कारके प्राप्ते सति तद्बाधनेन विहितं कर्म यथा – देवदत्तमभिक्रुध्यति, देवदत्तमभिद्रुह्यति। अत्र देवदत्तस्य 'क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः'[12] इति सूत्रेण सम्प्रदानत्वं प्राप्तम्। परञ्च 'क्रुधद्रुहोरुपसृष्टयोः कर्म'[13] इत्यनेन क्रुधद्रुहोरुपसृष्टयोरूपसर्गसम्बद्ध्योर्यं प्रति कोपः इति पूर्वसूत्रेण सम्प्रदानसंज्ञमपि कर्मसंज्ञमेव भवति। तथैव 'अक्षान् दीव्यति' इत्यत्र 'साधकतमं करणम्'[14] इत्यनेन सूत्रेण यत् करणसंज्ञकमेव, तत् 'दिवः कर्म च' इत्यनेन कर्मसंज्ञं फलति। एवं प्रकारेण काल्पनिकं कर्म चतुर्विधं। आहत्य कर्म सप्तविधं इति वक्तुं पार्यते।

निर्वर्त्यादि त्रिकं कर्म भाष्यकारादिसम्मतम् इति मतशब्देन भर्तृहरिः विवृणोति। कर्मचतुष्टयविषये तु न भाष्यकारादिसम्मतिः आदरणीया। तत् तु कल्पनाचातुर्यमात्रम्। त्रिककर्मभेदे एव दार्शनिकानां मतभेदः जायते तत्रैव विप्रतिपत्तयः सञ्जाताः।

निर्वर्त्यादि त्रिविधं कर्म भर्तृहरिणा परंपरया संक्षेपेण संकीर्तितम्। त्रिविधकर्मणः स्वरूपः एवंविधः विविच्यते।

यस्य निष्पाद्यमानस्य घटादेः प्रकृतिः अर्थात् उपादानकारणम्[15] कार्योत्पत्तेः पूर्वं विद्यमाना। यथा- घतादेः मत्रृदादिकाः अथवा कार्योत्पत्तेः पूर्वं अविद्यमाना यथा शब्दस्य संयोगादिः। (अभिघाताख्यः संयोगः ,वंशादेर्दलद्वयविभागश्च शब्दस्य प्रकृतिः वर्तते) प्रकृत्या सह यदा तत् कार्यं विवक्षते तदा निर्वर्त्यं कर्म स्यात्[16]।

यस्य उपादानकारणं नास्ति तन्निर्वर्त्यं यथा-संयोगं करोति। यस्यापि सदप्युपादानकारणं न विवक्ष्यते तन्निर्वर्त्यं यथा- घटं करोति इति। किन्तु यदा उपादानकारणमेव परिणामित्वेन विवक्ष्यते- मृदं घटं करोति इति तदा विकार्यं कर्म। भेदविवक्षायां तु मृदा घटं करोति इति। निर्वर्त्यमेव कर्म भवति। अत्र कार्योत्पत्तेः प्राक् प्रकृतेः अविद्यमानत्वञ्च अनभिव्यक्तरूपेण वेदितव्यम्। यथा घटादिकार्येण सह मृदादेः तत्प्रकृतित्वम् न तु ततः पूर्वविद्यमानत्वं इति माध्यमेन प्रकृतेः अविद्यमानत्वं। सैव परिणामिनी प्रकृति यदि अभेदेन न आश्रीयते , मृदं घटं करोति इत्येवं रीत्या न बोध्यते अपि च यदा प्रकृत्या सह मृदा घटं करोति इति भेदेनैव विवक्षा जायते तथा तन्निर्वर्त्यं कर्म कर्मस्वरूपज्ञाः ब्रुवते।

---

[11] पा०अ०,१-४-५१

[12] पा०अ०, १-४-३७

[13] पा०अ०, १-४-३८

[14] पा०अ०, १-४-४२

[15] यत्समवेतं कार्यमुत्पद्यते तत् समवायिकारणम्। यथा तन्तवः पटस्य, मृत्तिका घटस्य। न्यायशास्त्रे उपादानकारणमेव समवायिकारणम् वर्तते। तर्कसंग्रहः

[16] सती वा अविद्यमाना वा प्रकृतिः परिणामिनी। यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते। साधनसमुद्देशः, कारिका, ४७

भावार्थः वर्तते यदा विद्यमानाया अविद्यमानायाः वा प्रकृतेः विकृत्या सह अभेद विवक्षा तदा न निर्वर्त्यं कर्म, प्रकृतेः पूर्वसिद्धत्त्वात्। यदा तु भेदविवक्षा तयोः तदा तन्निर्वर्त्यं कर्म। अत्र प्रकृतेः पूर्वसिद्धत्त्वेऽपि विकृतेः पूर्वनिष्पाद्यमानत्वात् इत्यर्थः।

वैयाकरणानां मतेऽपि शब्दः संयोगादेः उपादानकरणत्वं वर्तते। यतोहि मीमांसानये शब्दस्य क्रियादिमत्त्वेन द्रव्यत्वात् तद्वत् वैयाकरणनिकायेऽपि शब्दस्य द्रव्यत्वात् तस्य प्रकृतिरुपत्वे न हानिः। उक्तं च काणादगौतमीयं- 'समवायिकारणत्वं (उपादानकरणत्वं) द्रव्यस्यैव इति विज्ञेयम्'।[17]

प्रकृतेः उपादानकारणस्य अभेदेन विवक्षायां मृदं घटं करोति, काशान् कटं करोति, अङ्गारान् भष्मकरोति इत्यादि विकार्यं कर्म स्यात् इति तु प्रागेव सिद्धम्। इदानी दर्शनद्वय-सांख्यन्यायदृशा निर्वर्त्यं कर्म भेदश्च विविच्यते[18]।
यद् उत्पत्तेः पूर्वमसद् घटादिकार्यम् उत्पद्यते इति न्यायमार्गः। अथवा उत्पत्तेः पूर्वं यद् घटादिकम् स्वोपादानकारणे सूक्ष्मरुपेण शक्तिरूपेण अवस्थितम् यद् जन्मना प्रकाश्यते इति सत्कार्यवादिनां सांख्यानां पथः। तदुभयमपि पूर्वमसत् सद् वा जन्मना प्रकाश्यमानत्वात् प्रकृतिविवक्षायां अर्थात् भेदविवक्षायां निर्वर्त्यं कर्म कथ्यते। अर्थात् यत् घटादिकं असत् अर्थात् कारणव्यापारात् प्राक् अविद्यमानम् कारणव्यापारात् महिम्ना उत्पद्यते तन्निर्वर्त्यं इति असत्कार्यवादिवैशेषिकमतानुसारेण। असतः कार्योत्पत्तिरिति तेषां मते। कारणव्यापारात् प्रागपि सदेव कार्यमिति इति जन्मना प्रकाश्यते। सत्कार्यवादिसांख्यमतेनोक्तम्।इत्युभयमते उत्पत्तेः पूर्वमसदनभिव्यक्तं वा जन्मना प्रकाश्यमानत्वात् निर्वर्त्यं कर्म कथ्यते। विकार्यं कर्म द्विधा विभजते। अत्र तु शब्दो निर्वर्त्याद्वैलक्षण्यसूचकः। निर्वर्त्यन्त्वेकमेव।विकार्यं कर्म द्विधं आचक्षते।

विभक्तस्य विकार्यस्य प्रतिव्यक्ति लक्षणं वर्तते।

'कर्तुरीप्सिततमं कर्म' इति कर्मसंज्ञासूत्रे विकार्यं कर्म द्विधं इति स्पष्टम्। प्रकृतेः=आत्मनः, विनाशं=नाशं, सम्भूतम्=प्राप्तम् इत्यत्र एकं विकार्यकर्म। तत्र दृष्टान्तः वर्तते- काष्ठादेः भस्मवत्। इत्यत्र काष्ठादिरूपप्रकृतेः भष्मं विकारभूतम्। अतस्मात् काष्ठं विकार्यं कर्म। एवमेव द्वितीयमाह- किञ्चित् गुणान्तरोत्पत्या विकार्यं कर्म। उद्धरणम् स्यात् - सुवर्णादिविकारवत् इत्यत्र सुवर्णपिण्डविकारभूतम् कुण्डलम् भवति। अतस्मात् अत्र सुवर्णं विकार्यं कर्म।

प्रागेव निर्णीतम् यत् प्रकृतेरविवक्षायां निर्वर्त्यं कर्म, प्रकृतिविवक्षायां (भेदविवक्षायां ) तु विकार्यं कर्म संभवति।किन्तु अत्र तु प्रकृतेः अविवक्षायामपि विकार्यं कर्म दृश्यते- काष्ठादिकमुपमृद्य भष्माविष्कृतम्। पूर्वलक्षणेन अर्थात् भेदविवक्षायां प्रकृतिः काष्ठादिकं साक्षात्  विकार्यं कर्म भवेत्।किन्तु द्वितीयलक्षणे प्रकृतेरविवक्षायां साक्षात्

---

[17]कारिकावली।

[18] प्रकृतेस्तु विवक्षायां विकार्यं कैश्चिदन्यथा।
निर्वर्त्यं च विकार्यं च कर्म शास्त्रे प्रदर्शितम्॥४८॥
यदसज्जायते सद् वा जन्मना यत् प्रकाश्यते।
तन्निर्वर्त्यं विकार्यं च कर्म द्वेधा व्यवस्थितम्॥४९॥ सा०समुद्देशः

विकार एव विकार्यं कर्म इति विशिष्टः अत्र। अत्र प्रकृतिभूतानि काष्ठानि साक्षात् विकार्यं कर्म इति तेषां क्रियासम्बन्धः प्राक्। तदभेदेन भष्मरूपो विकारोऽपि विकार्यं कर्म इति , तस्य क्रियासम्बन्धः पश्चादिति। 'सती वा अविद्यमाना वा' इत्यत्र पूर्वलक्षणेन तु एतद् भष्मरूपं निर्वर्त्यं कर्म एव भवितुं शक्यते न तु विकार्यं। किन्तु अत्र प्रकृतिभेदविवक्षया काष्ठरूपा प्रकृतिः विकार्यं कर्म तदभेदेन भष्मापि विकार्यं कर्म इति विशेषः। एवं गुणान्तरोत्पत्या- सुवर्णं कुण्डलं करोति इत्यत्र सुवर्णस्य विकार्यं स्यात्। अपि च सुवर्णपिण्डविकारभूतकुण्डलस्यापि विकार्यत्वं वर्तते। अत्र गुणमात्र परिवर्तनं शोभते इति विशेषः।

एतावत्व्याख्यानपर्यन्तम् भाष्यवार्तिकानुसारेणैव निर्वर्त्यादीनां लक्षणं निगदितं हरिणा। तथैव कर्मविभागोऽपि प्रतिपादितः। परञ्च वैयाकरणनिकाये केचनजनाः कर्मणः त्रैविध्यं न अङ्गीकुर्वन्ति। अस्मिन्मार्गे काशिकावृत्तेर्व्याख्यातारौ हरदत्तमिश्रजिनेन्द्रबुद्धी इति वैयाकरणौ स्वस्व पदमञ्जरीन्यासयोः कर्मणः चातुर्विध्यं विश्लेषयतः। तौ मूर्धन्यविद्वांसौ मीमांसामर्गमनुसरतः। तत्र खण्डदेवादिनव्यमीमांसकैः[19] निर्वर्त्यं, विकार्यं, प्राप्यं, संस्कार्यञ्चेति कर्मणः चातुर्विध्यं प्रस्तूयन्ते। यथा- व्रीहीन् प्रोक्षति इत्यादौ प्रोक्षणरूपसंस्कारस्य पूर्वोक्तत्रिषु कर्मसु अनन्तर्भावात् तस्य कर्मत्वाभावे व्रीहिशब्दात् द्वितीया न भवितुं शक्यते। अतस्मात् संस्कार्यस्यापि कर्मत्वं तैः अङ्गीकृतवन्तः। वाक्यपदीयस्य जातिसमुद्देशे 'ब्रीहीन् अवहन्ति' इत्यादौ व्रीहीणां संस्कार्यकर्मत्वं वाक्यपदीयकारः अनुमोदति।[20]

अत्र संस्कार्यकर्मणो निर्वर्त्ये प्राप्ये वा अन्तर्भावात् तस्य तुरीयत्वरूपेण कल्पनं अनावश्यकं स्यात्। अन्यथा व्याकरणसिद्धान्तस्योच्छेदापत्तिः सञ्जाता। जिनेन्द्रबुद्धि हरदत्तमिश्रवत् वाक्यपदीयस्य व्याख्याकारः हेलाराजोऽपि प्रकाशे कर्मणः चातुर्विध्यं प्रमादादेव प्रस्तौति इति वक्तुं पार्यते। अन्यथा भाष्यस्य त्रिविधं कर्म अनुसृत्य कथं चतुर्विधं व्यनक्ति। एवम्प्रकारेण भाष्यपरंपरया भर्तृहरिः कर्मणः निर्वर्त्यादिभेदेन त्रैविध्यमेव अङ्गीचकार इति निष्कर्षः।

निर्वर्त्ये कर्मणि घटादौ निर्वृत्तिः क्रियाकृतविशेषः उत्पत्तिरूपः प्रत्यक्षप्रमाणात् एव अवधार्यते। एवमेव विकार्ये भष्मकुण्डलादौ विकारः प्रत्येक्षेण एव बोध्यते।किञ्च प्राप्यकर्म तत्र भवति यत्र प्रत्यक्षं विहाय अनुमानेनापि क्रियाकृतविशेषाणां सिद्धिः न जायते।

यत्र कुत्रचित् प्रत्यक्षप्रमाणात् अथवा अनुमानप्रमाणात् क्रियाकृतविशेषाणां निश्चयः न स्यात् तत् प्राप्यं कर्म।[21] उदाहरणं वर्तते –'ग्रामं गच्छति' अत्र गते अगते ग्रामे गमनक्रिया कृतं न किमपि वैलक्षण्यं अनुभूयते। एवमेव 'वनं गच्छति' इत्यत्रापि दृष्टे अदृष्टे वा वने दर्शनक्रियाकृतं वैजात्यं न प्रत्यक्षीभूयते, नहि अनुभूयते। अतस्मात्

---

[19] तच्च कर्म चतुर्विधं-उत्पाद्यम्,आप्यम्, विकार्यं संस्कार्यं च। घटं करोति, घटं जानाति, व्रीहीन् अवहन्ति, व्रीहीन् प्रोक्षति। भाट्टरहस्ये, द्वितीयाविभक्त्यर्थनिरूपणे, पृ०-१९०

[20] जातिसमुद्देशः।

[21] क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते। दर्शनात् अनुमानाद् वा तत् प्राप्यमिति कथ्यते॥ साधनसमुद्देशः, कारिका, ५१

ग्रामवने प्राप्यकर्मणी वर्तेते। अन्यत्र ग्रामं दहति , वनं छिनत्ति, इत्यादिषु तथाविधे न प्राप्यकर्मणी। यतोहि दग्धे अदग्धे ग्रामे रूपवैशिष्ट्यात् । एवं छिन्ने अछिन्ने च वने वैजात्योपलम्भात्। अतः अत्र विकार्यकर्मणी एव।

कुत्रचित् प्रत्यक्षमतिरिच्य अनुमानादपि क्रियाकृतविशेषनिश्चयः बोध्यते। यथा दूरदेशे स्रक्चन्दनवनितादिसङ्गजनितानां आनन्दादीनां सुखप्रसादादिना लिङ्गेन अवबोधः भवति। स अनुमानरूपः एवमेव जलावसेकक्रियाजनितानां वनस्पतीनां प्रतिक्षणं वर्धनेत्यादिसूक्ष्मरूपः लिङ्गादेव अनुमीयते।

तदेवंविधो विशेषः क्रियाकृतो यत्र न संदृश्यते, तद् अदृश्यमानत्वेऽपि कर्तुः क्रियायाः विषयभावमात्रेणेप्सिततमत्वात् प्राप्यं कर्म भवति। यथा- आदित्यं पश्यति, नगरमुपसर्पति, वेदमधीते इत्यादिः। अत्र उद्धरणेषु दर्शनोपसर्पणाध्ययनादिक्रियाकृतः कश्चनविशेषः प्रत्यक्षानुमानाभ्यां ज्ञायते। प्रत्यक्षानुमानाभ्यां प्रमाणाभ्यां क्रियासम्बन्धमात्रं दृश्यते।न च तत्र क्रियासम्बन्धः एव क्रियाकृतविशेष। नगरे गमनक्रियाजनितः संयोगो द्विष्ठः भवन्नपि नगरस्य विस्तृतत्त्वात् लघुपरिमाणेन देवदत्तेन सह हिमवदङ्गुलिसम्बन्धवदलक्ष्यः एव इत्यर्थः। अत्र प्राप्यकर्म ज्ञेयम्।

निष्कर्षः – एवम्प्रकारेण निर्वर्त्यं, विकार्यं, प्राप्यञ्च इति भाष्यानुमोदितं त्रिविधमेव कर्म अत्र भर्तृहरेः कल्पनाचातुर्येण औदासीन्यद्वेष्यादिभेदेन सप्तविधत्वं प्राप्तं इति वक्तुं पार्यते। यद्यपि न च तत्र शब्दतः भर्तृहर्युक्तः तथापि एवंविधत्वे भेदे न कश्चित् दोषः दृश्यते इति मे मतिः।

## सन्दर्भग्रन्थसूची

**प्राथमिकस्रोतांसि –**


- भर्तृहरिः, वाक्यपदीयम्, पदकाण्डम्, प्रथमो भागः, (व्याख्याद्वयोपेतम्) सम्पूर्णानन्द संस्कृतविश्वविद्यालयः, वाराणसी, २०१६
- भर्तृहरिः, वाक्यपदीयम्, पदकाण्डम्, द्वितीयो भागः, (व्याख्याद्वयोपेतम्) सम्पूर्णानन्द संस्कृतविश्वविद्यालयः, वाराणसी, २०१६
- भर्तृहरिः, वाक्यपदीयम्, पदकाण्डम्, तृतीयो भागः, (व्याख्याद्वयोपेतम्) सम्पूर्णानन्द संस्कृतविश्वविद्यालयः, वाराणसी, २०१६
- भर्तृहरिः, वाक्यपदीयम्, तृतीयकाण्ड, प्रथमो भागः, अय्यर, सुब्रमनिय (सम्पादक),डेक्कन कालेज पोष्ट ग्रेजुएट एण्ड रिसर्च इंस्टीट्यूट, पुणे, १९९४
- भर्तृहरिः, वाक्यपदीयम्, हरिनारायण तिवारी (व्याख्याकार एवं सम्पादक), प्रथमो भागः, ब्रह्मकाण्डम्, चौखम्बा संस्कृत सीरीज आफिस वाराणसी, २०१५

- भर्तृहरिः, वाक्यपदीयम्, हरिनारायण तिवारी (व्याख्याकार एवं सम्पादक), द्वितीयो भागः, वाक्यकाण्डम्, चौखम्बा संस्कृत सीरीज आफिस वाराणसी, २०१५
- भर्तृहरिः, वाक्यपदीयम्, हरिनारायण तिवारी (व्याख्याकार एवं सम्पादक), तृतीयो भागः, पदकाण्डम् (पदकाण्डे प्रथमो भागः), चौखम्बा संस्कृत सीरीज आफिस वाराणसी, २०१५
- भर्तृहरिः, वाक्यपदीयम्, हरिनारायण तिवारी (व्याख्याकार एवं सम्पादक), तृतीयो भागः, पदकाण्डम् (पदकाण्डे द्वितीयो भागः), चौखम्बा संस्कृत सीरीज आफिस वाराणसी, २०१५
- तर्कालंकारः, जगदीशः, शब्दशक्तिप्रकाशिका, चौखम्बा संस्कृत प्रकाशन, वाराणसी, वि०सं०२०७०
- पतञ्जलिः, व्याकरणमहाभाष्यम् (भाग- १,२,३,४,५), भार्गवशास्त्री जोशी, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, २०१४
- पतञ्जलिः, महाभाष्यम्, युधिष्ठिरो मीमांसकः, श्री प्यारेलाल द्राक्षादेवी न्यास (ट्रस्ट्र) सी० ४, सी०सी०कालोनी, दिल्ली, वि.सं.२०३१
- भट्टोजिदीक्षितः, वैयाकरणसिद्धान्तकौमुदी (कारकान्तः प्रथमो भागः), गोपालदत्तपाण्डेयः (व्या०), चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१७
- वामनजयादित्यौ, काशिका 'प्रकाश-हिन्दीव्याख्योपेता' (प्रथमो भागः, द्वितीयो भागः) नारायणमिश्रः(व्या०), चौखम्बा प्रकाशन, वाराणसी, वि०सं० २०६२
- भट्टोजिदीक्षितः,वैयाकरणसिद्धान्तकौमुदी (प्रथमो भागः, द्वितीयो भागः, तृतीयो भागः, चतुर्थो भागः), ईश्वरचन्द्रः, चौखम्बा संस्कृत प्रतिष्ठान,दिल्ली, २०१०
- भट्टः, नागेशः, परमलघुमञ्जूषा, जयशंकरलालत्रिपाठी, चौखम्बा कृष्णदास अकादमी, वाराणसी, वि०सं०, २०४१
- भट्टः, नागेशः, परमलघुमञ्जूषा, लोकमणिदाहालः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१३
- भट्टः, कौण्डः, वैयाकरणभूषणसारः, चन्द्रिका प्रसाद द्विवेदी, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, २०१६
- भट्टः, कौण्डः, वैयाकरणभूषणसारः, ब्रह्मदत्तद्विवेदी, चौखम्बा पब्लिशर्स, वाराणसी, २०११
- मिश्रः, आद्याप्रसादः, लघुसिद्धान्तकौमुदी, भीमसेन शास्त्री, भैमी प्रकाशन, दिल्ली, २०१५

**द्वितीयकस्रोतांसि –**

- अय्यर, सुब्रह्मण्यम्, वाक्यपदीय ब्रह्मकाण्ड (स्वोपज्ञवृत्ति-पद्धति) डेकन कालेज, पूना, १९६६
- अय्यर, सुब्रह्मण्यम्, भर्तृहरि (हि०अनु०), रामचन्द्र द्विवेदी, राजस्थान हिन्दी ग्रन्थ अकादमी, जयपुर, १९८१
- शास्त्री, श्रीवत्स, हेलाराज का व्याकरण दर्शन को योगदान,विद्यानिधि प्रकाशन, दिल्ली, २०००
- शास्त्री, श्रीवत्स, भर्तृहरि और सोपज्ञवृत्ति, विद्यानिधि प्रकाशन, दिल्ली, २०१२
- शास्त्री, श्रीवत्स, वाक्यपदीय- सम्बन्धसमुद्देश (कारिकासहित हेलाराजीय प्रकीर्णप्रकाश का अनुवाद), विद्यानिधि प्रकाशनम्, दिल्ली, २०१४
- भाटिया, कान्तारानी, भर्तृहरि का वाक्यपदीय (पुण्यराज की दृष्टि में),भारतीय विद्या प्रकाशन, दिल्ली, १९९२
- झा, कामदेव, भर्तृहरिदर्शनम् (अष्टादश शोधपत्राणां समवायः), निर्मल बुक एजेन्सी, कुरुक्षेत्र, २०१२
- वर्मा, सत्यकाम, संस्कृतव्याकरण का उद्भव और विकास, मोतीलाल बनारसीदास, वाराणसी, १९७९

**English Books.**

- Iyer, Subrhmanian, Bhartrhari (A Study of the  Vakyapadiya in the light of the ancient commentaries) Poona ,1969
- Iyer, Subramanian, English translation of the Vakyapadiya of Bhartrhari with vartti, Poona, 1969
- Raja, K. Kunjunni And Coward Harold G, ENCYCLOPEDIA OF INDIAN PHILOSOPHIES, Vol- V, The Philosophy of the Grammarians, Motilal Banarasidas Publishers Private Limited, Delhi, 2008
- Biswal, Banamali, Bhartṛhari as a Grammarian & Philosopher, Padmaja Prakashan, Allahabad, 2006
- Chaturvedi, Mithilesh, Bhartṛhati, Language, Thoudht and Reality, (Proceedings of the International Seminar Delhi, December 12-14, 2003),  MOTILAL BANARSIDASS PUBLISHERS PRIVATE LIMITED, DELHI, 2009
- Pillai, K. Raghavan, Vakyapadiya, Motilal Banarasi Dass, Delhi, 1971

**कोशग्रन्थाः –**


- आप्टे, वामन शिवराम, संस्कृत हिन्दी शब्दकोश,  राधा पब्लिकेशन नई दिल्ली, २०१४
- सिंहः, अमरः, नामलिङ्गानुशासनम् नाम अमरकोषः (सुधा (रामाश्रमी) व्याख्यया सहितः), चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, २०११
- पाण्डे, उमा प्रसादः, संस्कृत हिन्दी अंग्रेजी शब्दकोश, कमल प्रकाशन, नई दिल्ली